श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकाशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकाशीतितमं दशकम् ॥

## सुभद्राहरणं, कालिन्द्यादिविवाहवर्णनं, नरकासुरवधवर्णनं च

स्निग्धां मुग्धां सततमपि तां लालयन् सत्यभामां
यातो भूयः सह खलु तया याज्ञसेनीविवाहम्।
पार्थप्रीत्यै पुनरपि मनागास्थितो हस्तिपुर्यां
शक्रप्रस्थं पुरमपि विभो संविधायागतोऽभूः ॥ 81.1 ॥

भद्रां भद्रां भवदवरजां कौरवेणार्थ्यमानां
त्वद्वाचा तामहृत कुहनामस्करी शक्रसूनुः।
तत्र क्रुद्धं बलमनुनयन् प्रत्यगास्तेन सार्धं
शक्रप्रस्थं प्रियसखमुदे सत्यभामासहायः ॥ 81.2 ॥

तत्र क्रीडन्नपि च यमुनाकूलदृष्टां गृहीत्वा
तां कालिन्दीं नगरमगमः खाण्डवप्रीणिताग्निः।
भ्रातृत्रस्तां प्रणयविवशां देव पैतृष्वसेयीं
राज्ञां मध्ये सपदि जहृषे मित्रविन्दामवन्तीम् ॥ 81.3 ॥

सत्यां गत्वा पुनरुदवहो नग्नजिन्नन्दनां तां
बध्वा सप्तापि च वृषवरान् सप्तमूर्तिर्निमेषात्।
भद्रां नाम प्रददुरथ ते देव सन्तर्दनाद्या -
स्तत्सोदर्या वरद भवतः साऽपि पैतृष्वसेयी ॥ 81.4 ॥

पार्थाद्यैरप्यकृतलवनं तोयमात्राभिलक्ष्यं
लक्षं छित्वा शफरमवृथा लक्ष्मणां मद्रकन्याम्।

अष्टावेवं तव समभवन् वल्लभास्तत्र मध्ये
    शुश्रोथ त्वं सुरपतिगिरा भौमदुश्चेष्टितानि ॥ **81.5** ॥

स्मृतायातं पक्षिप्रवरमधिरूढस्त्वमगमो
    वहन्नङ्के भामामुपवनमिवारातिभवनम्।
विभिन्दन् दुर्गाणि त्रुटितपृतनाशोणितरसैः
    पुरं तावत् प्राग्ज्योतिषमकुरुथाः शोणितपुरम् ॥ **81.6** ॥

मुरस्त्वां पञ्चास्यो जलधिवनमध्यादुदपतत्
    स चक्रे चक्रेण प्रदलितशिरा मङ्क्षु भवता।
चतुर्दन्तैर्दन्तावलपतिभिरिन्धानसमरं
    रथाङ्गेन छित्वा नरकमकरोस्तीर्णनरकम् ॥ **81.7** ॥

स्तुतो भूम्या राज्यं सपदि भगदत्तेऽस्य तनये
    गजञ्चैकं दत्वा प्रजिघयिथ नागान्निजपुरीम्।
खलेनाबद्धानां स्वगतमनसां षोडश पुनः
    सहस्राणि स्त्रीणामपि च धनराशिं च विपुलम् ॥ **81.8** ॥

भौमापाहृतकुण्डलं तददितेर्दातुं प्रयातो दिवं
    शक्राद्यैर्महितः समं दयितया द्युस्त्रीषु दत्तह्रिया।
हृत्वा कल्पतरुं रुषाभिपतितं जित्वेन्द्रमभ्यागम -
    स्तत्तु श्रीमददोष ईदृश इति व्याख्यातुमेवाकृथाः ॥ **81.9** ॥

कल्पद्रुं सत्यभामाभवनभुविसृजन् द्व्यष्टसाहस्रयोषाः
    स्वीकृत्य प्रत्यगारं विहितबहुवपुर्लालयन् केलिभेदैः।
आश्चर्यान्नारदालोकितविविधगतिस्तत्र तत्रापि गेहे
    भूयः सर्वासु कुर्वन् दश दश तनयान् पाहि वातालयेश ॥ **81.10** ॥

॥ इति श्रीमन्नारायणीये एकाशीतितमं दशकं समाप्तम् ॥